The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

# वेदान्तसांख्यदर्शनदिशा त्रिगुणविमर्शः

डाँ सुदेष्णा दाशः
अतिथि अध्यापिकाअद्वैतवेदान्तविभागः
सरकारी डिग्री संस्कृत महाविद्यालयः वारिपदा

**शोधसारः-**

वैदिककालादारभ्य वेदविद्यासिद्धान्त स्वरूपेषु षड्षु दर्शनेषु ब्रह्मात्मैक्यवोधाय वेदान्तदर्शनस्य प्रामुख्यं वेदविद्भिः विनिश्चितम्। तत्र वेदान्तनाम संहिता-ब्रह्मण-आरण्यकउपनिषत्सु चतुर्षु भागेषु अन्तिमत्त्वात् उपनिषत्प्रमाणं मन्यन्ते। वेदान्तदर्शनस्य प्रतिपादकः महर्षि व्यासदेवः ब्रह्मसूत्रम् प्रणीतवान्। एतस्य ग्रन्थस्य यद्यपि बहवः व्याख्यातरः सन्ति। तेषु श्रीशङ्कराचार्यकृतं शारीरिकभाष्यम्- अद्वैतवादं, मध्वाचार्यकृतं पूर्णप्रज्ञभाष्यं द्वैतवादस्य, रामानुजलिखितं श्रीभाष्यं विशिष्टाद्वैतवादं, वल्लभाचार्यकृतं वल्लभभाष्यं शुद्धाद्वैतवादं, बलदेवरचितं गोविन्दभाष्यं, बैष्णवमतं प्रतनोति स्म। यद्यपि सत्त्वरजस्तमसां साम्यत्वमेव प्रकृतिरिति सांख्यनये स्पष्टीकृता । तदेव वेदान्ते माया इति उच्यते। तथा हि मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।

सांख्यदर्शने सत्त्वरजस्त्वमसां गुणत्रयाणां साम्यवस्ता प्रकृतिः । एतन्मते पुरुषनित्य अव्ययश्च ।प्रकृति सहचर्यात् दुःखः सञ्जायते। यदा पुरुषस्य सम्बन्ध प्रकृत्या सहनस्यति। तदा मोक्षः लभ्यते। यद्यपि प्रकृति जडा अचेतन च तथापि पुरुष संसर्गात् सा क्रियाशिलात् भवति। तत्र सृष्टिप्रक्रियां रजस्तमसुरपेक्षया सत्वगुणाधिक्ये प्रकृतितः महतत्त्वस्य उत्त्पत्तिः। रजोगुणस्य आधिक्ये प्रकृतितः अहं तत्वस्य सृष्टि तमोगुणस्य आधिक्ये प्रकृतितः पञ्चतन्मात्रा, पञ्चमहाभूत, एकादशेन्द्रियाणां उत्त्पत्तिः जायते। इति।

**कूटशब्दाः**

**वेदान्तः, अद्वैतम्, त्रिगुणः प्रकृतिः**

**उपक्रमः-**

सांख्यदर्शने सत्त्वरजस्तमसां गुणत्रयाणां साम्य वस्ता प्रकृतिः एतन्मते पुरुषः नित्यः अव्ययश्च। प्रकृति सहचर्यात् दुःखं सञ्जायते। यदा पुरुषस्य सम्बन्धः प्रकृत्या सह नश्यति। तदा मोक्षः लभ्यते। यद्यपि प्रकृति जडा अचेतन च तथापि पुरुषसंसर्गात् सा क्रियाशीला भवति। तत्र सृष्टिप्रक्रियां रजस्तमसुतोरपेक्षया सत्त्वरुपाधिक्ये प्रकृतितः महतत्त्वस्य उत्पत्तिः रजोगुणस्य आधिक्ये प्रकृतितः अहं तत्त्वस्य सृष्टिः तमोगुणस्याधिक्ये प्रकृतितः पञ्चतन्मात्रा, पञ्चमहाभूतएकादशेन्द्रियाणामुत्पत्तिः जायते इति।

विदन्ति अनेन धर्माधर्मौ इति विद् ज्ञाने (अ.प.अ) विदन्ति वा विदन्ते (विचारयन्ति) अनेन इति वा, विद् विचारणे वेदयन्ति अनुभवन्ति वदन्ति परमात्मतत्त्वमनेन इति वेदशब्दस्य ब्युत्पत्तिर्भवितुमर्हति । हलश्च[1] इति सूत्रेण घञ् प्रत्ययेन, वेदः शब्दः निष्पन्नः । अन्तिमः पक्षः समर्थ्यते वेदस्य नित्यत्त्ववादिभिर्मीमांसकैः। औपुरुषेयो नित्यो वेद इति तेषामभिप्रायः। वेदान्तिनो ब्रह्मान्तरेण सर्वमनित्यंमायिकं चेति यद्यप्यभिप्रयन्ति, प्रतिकल्पंयथानुपूर्विकं वेदस्य नित्यत्वमपि स्वीकुर्वन्ति।

**यो वै ब्राह्मणं विदधाति पूर्वम्।**

**यो वै वेदांश्चप्रहिणोति तस्मै।[2]**

धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु परमपुरुषार्थः न स पुनरावर्तते इति श्रुतिप्रमाणम् तस्य नित्यत्वावगमात् । अद्वैतप्रतिपाद्यो मोक्षो नोत्पाद्य नित्यत्वात्, न विकार्यः अविकारित्त्वात् नाप्यः नित्यप्राप्तात्मस्वरूपत्वात् नापि संस्कार्यः शुद्धत्वात्। मोक्षः अयं प्राप्तस्यैव प्राप्तिः कण्ठाग्रैवेयकवत्, न तु अप्राप्तस्य प्राप्तिः इति। आत्मस्वरूपमविद्यया आच्छादितम्,तस्याः अविद्ययाः नाशे स्वात्मस्वरूपप्राप्तिः इति प्राप्तस्यैव प्राप्तिः मोक्षः। तस्मादिविद्यानिवृत्तिरपि मोक्षपदेनाभिधीयते। अविद्यानिवृत्तिमात्र मोक्षः इति व्यवहारः।

**वेदान्तसांख्ययोः स्वरूपम्-**

यथा रज्वादौ सर्पाद्यज्ञाननिवृत्तौ सर्पादिनिवृत्तिः । तदेव प्रातिपादितं वार्तिककारेण सुरेश्वराचार्येण बृहदारण्यके-

**फलञ्च मोक्षोअयविद्यानिवृत्तिर्वा** [3] ।

वेदान्तचिन्तने आत्मनः परं परमतत्वेन भानम्। लोके तत्त्वेषु आत्मतत्त्वं परं महत्त्वं च साकल्येनावहति। अत्र अनन्तस्य अज्ञातस्य अवर्णनीयस्य आत्मतत्त्वस्य गाम्भीर्यं निवेदयितुं अल्पाक्षरयुक्तपदस्य अन्वेषणे वेदान्तिनः महच्छब्दं प्रापुः। अतएव तैः आत्मतत्त्वस्वरूपस्य आत्यान्तिकतत्त्वस्य च प्रातिपादिकं महावाक्यसंज्ञया स्वीकृतं दृश्यते। महावाक्यान्तर्भूतेषु उपनिषद्वाक्येषु **अयमात्मा ब्रह्म** माण्डुक्योपनिषदि अन्तर्भूतं महावाक्यं ब्रह्म-ज्ञान-संवेदनविषये निर्दोषवाक्यतां प्राप्नोति।

**सांख्यदर्शनम्-**

सम् उपसर्ग पूर्वकात् ख्या धातोः अङ् प्रत्यये टाप् प्रत्त्यये च संख्याशब्दस्य निष्पत्तिः। संख्यायन्ते गणयन्ते येन तत्सांख्यम् ।

**संख्याप्रकुर्वते चैव प्रकृतिश्च प्रचक्षते।**

**तत्त्वानां चतुर्विंशतिस्तेन सांख्याः प्रकीर्तिताः।।**

दुःखानां आत्यन्तिक निवृतितिरेव सांख्यदर्शनस्य मुख्य प्रतिपाद्यविषयः प्रकृतिपुरुषविषयक भेदजन्यज्ञानमुक्तिलाभ एव अस्य प्रयोजनं भवति।

**पंचविंशति तत्त्वज्ञो यत्र तत्राश्रमे वसेत्।**

**जटी मुणडी शिखी वाऽपि मुच्यते नात्र संशयः।।**

**वेदान्तसांख्यस्थत्रिगुणप्रामाण्यम्-**

वेदस्य अन्तः वेदान्तः उपनिषत्प्रमाणभूतः कथ्यते। वेदस्य मुख्यतया कर्मकाण्ड- ज्ञानकाण्डभेदेन द्विधा विभागात् कर्मोपासनाज्ञानभेदेन त्रिधा विभागाद्वा तदेवान्तिमकाण्डमुपनिषदित्युच्यते। वेदान्त इति यस्य प्रसिद्धिः। श्रुतिशिरः श्रुतिशिखा, आम्नायशीर्षकमित्यप्याम्नायते। यत्तु सदानन्देन वेदान्तसारे वेदान्तोनामपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च इत्युक्तं तद्गौण्या वृत्याभवितुमर्हति, न तु मुख्यतया । यतो वेदान्तापरपर्यायाणामुपनिषदां विचारश्चर्या वा तेषु तेषु ग्रन्थेषु दृश्यते। अतो ब्रह्मसूत्र- शारीरकभाष्य- विवेकचूडामणिपञ्चदश्यादीनां वेदान्ततत्त्वं गुणवृत्त्यैव सिद्ध्यति। पौरुषेयत्वाद्यद्यपि क्वचिदुपनिषत्सिद्धान्तादन्यथोक्तं तदग्राह्यमपि भवेत्।भ्रम-प्रमाद-

विप्रलिप्साकरणापाटवादिदोषग्रस्त-त्वात्पौरुषेयत्वम्, उपनिषदां ब्राह्मणानां पौरुषेयत्वं चामनन्ति। तेषां मते एतत्सर्वं वैदिकं साहित्यं न वेदाः। परं नेदं मतं रोचते विपश्चिद्भ्यः। इशावास्यमिदम् इत्याद्युपनिषदः शुक्लयजुर्वेदान्तिम अध्यायत्वेन माध्यन्दिन काण्व-शाख्योरुपलभ्यात्, अपि च कृष्णयजुर्वेदतैत्तिरीयशाखायाः मन्त्रब्राह्मणयोर्मिलितरूपत्वात्। मन्त्रब्राह्मणयोर्वेदनामधेय इति आपस्तम्बादीभिरनैकैर्मनीषि भिरङ्गीकृतत्वाच्च।

उपनिषद् एव वेदान्तो मुख्यया वृत्त्याब्रह्मसूत्रभाष्यसंक्षेपशारीरका-द्वैतसिद्धिवेदान्तपरिभाषादयो गौण्या वृत्त्येति नेदं केवलं मामकीनं मतम्। आदि शब्देन भगवद्गीताद्यध्यात्मशाश्त्राणि गृह्यन्ते। तेषामप्युपनिषच्छब्दवाच्यत्वादिति तदुपास्यते। ब्रह्मदर्शी श्री शङ्कराचार्यः स्वस्य स्वतपोलब्ध प्रज्ञा प्राभावात् निखिलजनकल्याणाय अविद्यतमिश्रनाशाय अद्वैतवेदान्तं प्रतिष्ठापयामास ।

**त्रिगुणः-**

गुणयति आमन्त्रयति इति धातोः इत्यच् प्रत्ययेन गुणशब्दस्य निष्पत्तिः, अस्य ब्युत्पत्तिगति अर्थः संबोधक अवाहको वा । अर्थात् येन जनास्तत्समीपं गच्छन्ति यथा शैर्यधैर्यौदयः। लोके गुणिनम्प्रत्येव जना गच्छन्तिआद्रीयन्ते वा गुणहीनमुपेक्ष्यन्ते इति तु सुस्पष्टम्। अन्यच्च ब्युत्पत्तिनिमित्तम् अन्यच्च प्रयोगनिमित्तमितिमहिमभट्टोक्तादिशास्य पदस्यार्थः शास्त्रभेदेषु भिन्ना उपलभ्यते। तथा हि व्याकरणे अदेङ्गगुणः[4] ये रसस्याङ्गिनो धर्माः शोर्यादय इवात्मनः इति विश्वनाथोक्तेः। गणितशास्त्रे गुणनं वृद्धिप्रक्रियाविशेषः यथा त्रयाणां त्रिगुणो नव इति। वैशेषिकदर्शने द्रव्याश्रयित्वरूपः अर्थः। ते च चतुर्विंशतिः रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-गुरुत्वद्रव्यत्व-स्नेह शब्द-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्माधर्म-संस्कारः। सांख्यशास्त्रमते प्रधानस्य प्रकृतेर्वा उपादानभूतः सत्त्वं रजस्तमश्चेति त्रयः। सांख्यसिद्धान्तानुसारेण जगद्वैचित्र्यस्य वैविध्यस्य वा कारणं गुणत्रयमेव।

मूलभूतासु ईशावास्यादिषु प्रधानसूपनिषत्सु क्वापि गुणानां चर्चा नोपलभ्यते। वेदान्तदर्शनमिति प्रथितिं गतेषु ब्रह्मसूत्रेषु नैकमपि गुणविषयकं सूत्रितं व्यासने। शारीरकमीमांसाख्ये आचार्यवर्यप्रणीते शङ्करभाष्ये प्रत्युत तस्यगुणत्रयस्य खण्डनं कृतमस्ति ।प्रथमाध्यायस्य चतुर्थपादे नवमसूत्रे ज्योतिरूपक्रमा तु तथा ह्यधीयत एके आचार्यः स्पष्टमाचष्टे ।भूतत्रयलक्षणैवेयमजा विज्ञेयान गुणत्रयलक्षणेति। अजामेकां लोहित-शुक्ल-कृष्णामित्यादि श्वेताश्वेतरोपनिषन्मत्र उद्धृत्य गुणत्रया प्रकृतिः श्रुतिसम्मता, अतः सांख्यमतं श्रौतं न खण्ड्यमिति पूर्वपक्षत्वेनोत्थाप्य सिद्धान्तत्वेन छान्दोग्योपनिषद्वाक्यान्युद्धृत्य सम्यकतया समाहितमा-चार्येण। अतो यः अयं गुणत्रयवादो वेदान्ते अस्ति इति। तत्सांख्यसिद्धान्तप्रभावितैः परवर्तिभिर्वेदान्तिभिरेव न तु वेदान्तस्यायं विचारः अतः गीतायाश्चतुर्दशाध्याये-

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः**

**निवध्नन्ति महावाहो देहे देहिनमव्ययम्।।**[5]

इत्याद्युक्तं परवर्तिषु अध्यायान्तरेष्वपि गुणत्रयचर्चा दृश्यते तत्सर्वं पुराण-प्रभाविता परवर्तिनी रचना। एतद् वचनम अवश्यमेवास्तिकमहाजनानुद्वेजयेत् । या स्वयं पद्मनाभस्य मुखपद्माविनिसृताः इत्यादि वाक्यैः सञ्जातश्रद्धातिशय्यात मामेते नास्तिक आर्यसमाजी वेति मन्येरन्। एतदप्रियमपि सत्यम्। श्रद्धाजाड्यमपहायमनागौदार्यमवलम्ब्य मदुक्तेर्याथार्थ्यं चिन्तनीयम्। येनैव व्यासेन ब्रह्मसूत्राणि प्रणीतानि तेनैव चेद्गीता विरचिता कुतो नैकमपि सूत्रितं गुणत्रयविषये। व्याम्प्रति शङ्कराचार्यमप्रति जनमानसे श्रद्धातिशयो वर्तते। तस्यैव दुरुपयोगं कृत्वा परवर्तिविभिर्विद्वद्भिः स्वस्वविचारस्तन्नाम्ना प्रचारितः। गीता येन विरचिता नासौ देवानां प्रियः एतत्सत्यम्। तत्रापि

बहव उपादेया विषयाः सन्ति। ते नूनं स्वीकार्याः परं परप्रत्ययनेयबुद्धिः सन् विवेकाय तिलाञ्जलिं दत्वा कार्त्स्येन स्वीकारो मे न रोचते। निर्बाण शब्दो अपि बौद्धदर्शने दरीदृश्यते न सांख्यवेदान्ताद्यास्तिकदर्शनेषु । ब्रह्मनिर्वाणमृच्छतीति प्रयोगो गीतायाः बौद्धपरवर्तित्वं पिशुनयति।

प्रस्थानत्रय्यन्तर्गताया गीताया अस्वीकारः साहसमात्रं, भगवतः शङ्कराचार्यस्य तदुपरि भाष्यविरचनादिति चेत् सत्यम्, प्रस्थानत्रयी पदमाचार्यशङ्करेण प्रयुक्तमन्येन केन वा इति प्रश्न प्रथमं चेच्छारीकभाष्यकारेणसम्प्रत्याद्यशङ्कराचार्यत्वेनोच्यमानेनापरेण वा ? यतो हि सम्प्रति प्रसिद्धान् चतुरो मठानपहाय मठान्तरेष्वपि बहवो दण्डिन आत्मनः शङ्कराचार्यान् घोषयन्ति। सांख्यसिद्धान्तानुसारं प्रधानस्यैकत्वमेव पुरुषाणां बहुत्वञ्च।

**उपसंहारः-**

पुरुषसन्निध्येन प्रकृतेर्गुणवैषम्यात्सृष्टिः। परं योगसिद्धान्ते क्लेशकर्मविपाकशयैरपरामृष्टः पुरुषविशेष ईश्वरः इति षड्विंशं तत्त्वं स्वीकृतम्। पुराणेष्वपि तथैव प्रकृतिपुरुषयोर्नियामकत्वेनः ईश्वरः स्वीकृतः। गीताभाष्येअपि इश्वपरतन्त्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं न तु सांख्यमिव स्वतन्त्रययोरित्येवमर्थः इत्युपलभ्यते। प्रसिद्धानामाचार्याणमृषीणां च नामभिर्बहवो ग्रन्थाः विरचिताः सम्यक्परीक्षया याथार्थ्यं संगछते।

विवेकचूडामणावपि-

**अव्यक्तनाम्नी परमेशशक्तिरनाद्याविद्या त्रिगुणात्मिका परा।**

**कार्यानुमेयासुधियैव माया यया जगत्सर्वमिदं प्रस्तूयते।।**[6]

इति त्रिगुणात्मिका माया स्वीकृतेति भाष्यविरुद्धसिद्धान्तः प्रतिपादितो अस्ति। यतो हि स्पष्टमुक्तं शङ्करेण भाष्ये –

**या मूलप्रकृतिरभ्युपगम्यते तदेव नो ब्रह्मेत्यविरोधः**[7]।

**सर्वस्य हि जानिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितम्** [8]

**यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व**[9] **। तस्माद्वा एतस्मादात्मान आकाशः सम्भूत आकाशाद्वायुरित्यादि**[10] प्रत्यक्षमेव ब्रह्म जगत्कारणत्वेनश्रुतिद्वयमाम्नाति। तदेव – **जन्माद्यस्य यतः**[11]

सूत्रेणानेन वादरायणेन सूचितम्। नात्र प्रधानस्य गुणत्रयस्य वा गन्धोSप्याघायते। सत्यकामादयो गुणाः। **समस्तगुणोपसंहारोअशक्यः**[12] भाष्ये इत्येतावता सांख्यप्रतिपादितेभ्यो गुणेभ्योअतिरिक्ता गुणाउक्ताः। सामान्यानां बोधसौकर्यार्थं परवर्तिभिर्वेदान्तपक्षपाति-भिर्विद्वद्भिरेतत् सत्त्वरजस्तमोगुणत्रयं सांख्यमतस्योररीकृतमिति प्रतिपाद्यते।

**पादटीकाः-**

1. पा.सू (3.3.121)
2. (श्वे. उ.6.18)

3. (बृ.उ.1.4.7)
4. (1.1.2)
5. ( गी. 14.5)
6. वि.चू. श्लो- 110
7. (ब्र. सू भा. 2.3.9)
8. (ब्र.सू भा. 4.28)
9. (तै.उ. 3.1)
10. (तै.उ.2.9)
11. (ब्र.सू. 1.2..2)
12. (ब्र.सू.3.3.58)